# ApaduddhAraka shrIhanUmatstotram

# આપદુદ્ધારક શ્રીહનૂમત્સ્તોત્રમ્

## Document Information

Text title : ApaduddhArakahanUmatstotram

File name : ApaduddhArakahanUmatstotram.itx

Category : hanumaana, stotra

Location : doc_hanumaana

Transliterated by : Processed by Sowmya Ramkumar

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Latest update : September 19, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

ApaduddhAraka shrIhanUmatstotram

# આપદુદ્ધારક શ્રીહનૂમત્સ્તોત્રમ્

વિભીષણકૃતમ્

શ્રીહનુમતે નમઃ । અસ્ય શ્રીહનુમત્સ્તોત્રમહામન્ત્રસ્ય, વિભીષણ
ઋષિઃ, અનુષ્ટુપ્ છન્દઃ, હનુમાન્ દેવતા । મમ શત્રુમુખસ્તમ્ભનાર્થે
સર્વકાર્યસિદ્ધ્યર્થે ચ જપે વિનિયોગઃ ।

ધ્યાનમ્

ચન્દ્રાભં ચરણારવિન્દયુગલં કૌપીનમૌઞ્જીધરં
નાભ્યાં વૈ કટિસૂત્રયુક્તવસનં યજ્ઞોપવીતાવૃતમ્ ।
હસ્તાભ્યામવલમ્બ્ય ચાઞ્જલિમથો હારાવલીકુણ્ડલં
બિભ્રદ્દીર્ઘશિખં પ્રસન્નવદનં દિવ્યાઞ્જનેયં ભજે ॥

મન્ત્રઃ-ૐ નમો હનુમતે રુદ્રાય ।
મમ સર્વદુષ્ટજનમુખસ્તમ્ભનં કુરુ કુરુ ॥

મમ સર્વકાર્યસિદ્ધિં કુરુ કુરુ । ઐં હ્રાં હ્રીં હ્રૂં ફટ્ સ્વાહા ।
note અષ્ટવારં જપેત્ ।
આપન્નાખિલલોકાર્તિહારિણે શ્રીહનૂમતે ।
અકસ્માદાગતોત્પાતનાશનાય નમોઽસ્તુ તે ॥ ૧॥

સીતાવિયુક્તશ્રીરામશોકદુઃખભયાપહ ।
તાપત્રયસ્ય સંહારિન્નાઞ્જનેય નમોઽસ્તુ તે ॥ ૨॥

આધિવ્યાધિમહામારિગ્રહપીડાપહારિણે ।
પ્રાણાપહન્ત્રે દૈત્યાનાં રામપ્રાણાત્મને નમઃ ॥ ૩॥

સંસારસાગરાવર્તાગતસમ્ભ્રાન્તચેતસામ્ ।
શરણાગતમર્ત્યાનાં શરણ્યાય નમોઽસ્તુ તે ॥ ૪॥

રાજદ્વારે બિલદ્વારે પ્રવેશે ભૂતસઙ્કુલે ।
ગજસિંહમહાવ્યાઘ્રચોરભીષણકાનને ॥ ૫॥

મહાભયેઽગ્નિસંસ્થાને શત્રુસઙ્ગસમાશ્રિતે ।
શરણાગતમર્ત્યાનાં શરણ્યાય નમો નમઃ ॥ ૬॥

પ્રદોષે વા પ્રભાતે વા યે સ્મરન્ત્યઞ્જનાસુતમ્ ।
અર્થસિદ્ધિયશઃકામાન્ પ્રાપ્નુવન્તિ ન સંશયઃ ॥ ૭॥

કારાગૃહે પ્રયાણે ચ સઙ્ગ્રામે દેશવિપ્લવે ।
યે સ્મરન્તિ હનૂમન્તં તેષાં સન્તિ ન આપદઃ ॥ ૮॥ નાસ્તિ વિપત્તયઃ
વજ્રદેહાય કાલાગ્નિરુદ્રાયામિતતેજસે ।
નમઃ પ્લવગસૈન્યાનાં પ્રાણભૂતાત્મને નમઃ ॥ ૯॥

દુષ્ટદૈત્યમહાદર્પદલનાય મહાત્મને ।
બ્રહ્માસ્ત્રસ્તમ્ભનાયાસ્મૈ નમઃ શ્રીરુદ્રમૂર્તયે ॥ ૧૦॥

જપ્ત્વા સ્તોત્રમિદં પુણ્યં વસુવારં પઠેન્નરઃ ।
રાજસ્થાને સભાસ્થાને વાદે પ્રાપ્તે જપેદ્ધ્રુવમ્ ॥ ૧૧॥

વિભીષણકૃતં સ્તોત્રં યઃ પઠેત્ પ્રયતો નરઃ ।
સર્વાપદ્ભ્યો વિમુચ્યેત નાત્ર કાર્યા વિચારણા ॥ ૧૨॥

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

---

*ApaduddhAraka shrIhanUmatstotram*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*